# kAverI athavA sahyajAnavaratnamAlikA

# કાવેરી અથવા સહ્યજાનવરત્નમાલિકા

## Document Information

Text title : Kaverinavaratnamalika or Sahyajanavaratnamalika

File name : kAverInavaratnamAlikA.itx

Category : nava, devii, nadI, stotra, tyAgarAja, devI

Location : doc_devii

Author : Tyagaraja

Transliterated by : Suresh Pitre suresh.pitre at gmail.com

Proofread by : Suresh Pitre suresh.pitre at gmail.com

Latest update : October 31, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# કાવેરી અથવા સહ્યજાનવરત્નમાલિકા

શ્રીગણેશાય નમઃ ।
શ્રીગુરુભ્યો નમઃ ।

॥ શ્રીઃ ॥

અથ સહ્યજાનવરત્નમાલિકા ।
યત્પાથઃકણવાહિ મારુતલવ સ્પૃષ્ટેષુ દુષ્ટેષ્વપિ
પ્રધ્વંસમ્પ્રબલૈનસાં વિદુરિહ પ્રાજ્ઞાભવાજ્ઞાજુષઃ ।
સિષ્ણાસાં ત્વયિબિભ્રતો મમચિરાત્ કૃષ્ણાધિકે સહ્યજે
નિષ્ણાતાસિ ન કિં વિગાહનકૃતઃ પઙ્કૌઘસઙ્ક્ષાલને ॥ ૧॥

કાવેરિત્વત્કવારિ પ્રવહતિ સરિતાં સાર્વભૌમીહભૂમૌ
યત્રાયમ્પુણ્યદેશઃ સતુકિમુત વૃષાકપ્યભીષ્ટસ્થલઞ્ચેત ।
કાશ્યા તુલ્યાનિ યાનિત્વગણિષત ષડપ્યાર્ષગીષુસ્થલાનિ
શ્વેતારણ્યં ચ તેષ્વાદિમમિહવસતાં કોયમસ્તસ્યકેઽમી ॥ ૨॥

કાવેરિ ત્વદ્વારિ પુરોદરેઽસ્મિન્
સ્નાયં સ્નાયં ધૂતપાપોઽસ્તતાપઃ ।
આસઞ્જીર્ણઃ પૂર્ણકામસ્તદિત્થં
વિજ્ઞાપ્યસ્તે વલ્લભ સિન્ધુરાજઃ ॥ ૩॥

રાજ્ઞઃસેવાદુષ્કરાસર્વનૃણાં
કાન્તોભીમૈર્ભીમરૂપસ્સ યસ્માત્ ।
પ્રાપ્તાયેતદ્વલ્લભાયાઃ પ્રસાદં
સિદ્ધંસર્વાભીષ્ટમેષાં હ્યયત્નાત્ ॥ ૪॥

મહારાવારવારૌઘૈઃ ભીષણૈઃ શ્રોત્રભીર્તિદૈઃ ।
કથન્નુમાદૃશાં શક્યો રાજાપામુપસેવિતુમ્ ॥ ૫॥

અમ્ભોનિધેરનુગુણં ભવતીકલત્રં

લોકાન્ વિલોકનત એવ યુવાં પુનીથઃ ।
પાનાવગાહન મુખોપકૃતિ પ્રકર્ષાત્
દેવિત્વમેનમતિશય્ય વિભાસિમાતઃ ॥ ૬॥

કાલં પતીક્ષ્યૈવ સજાતુ સેવ્યઃ
ત્વત્તોઽધિકઙ્કિંન્નુ ફલન્દદાતિ ।
તસ્માન્નદીરાજમહિષ્યલંમે
ત્વત્સંશ્રયો યત્ફલમમ્બસૂતે ॥ ૭॥

અસહ્યપાપવારિણિ ત્વદીયપુણ્યવારિણિ
ક્વસહ્યજે નિમજ્જતામઘૌઘ સાધ્વસંનૃણામ્ ।
વિધૂતપાતકા હિ તે વિનૈવકૃચ્છ્રજશ્રમં
પ્રયાન્તિ શમ્ભુમન્દિરં પ્રકૃષ્ટપુણ્યભાસુરાઃ ॥ ૮॥

સહ્યાદ્રેઃપિતુરન્તિકાત્ પતિગૃહં ગન્તુમ્પ્રવૃત્તાસતી
કાવેરી કૃતચોલમણ્ડલ પરિષ્કારાભ્યુદગ્ચદ્રસા ।
સ્વર્ણસ્તોમયુતા સતી પ્રિયતમં સન્તોષ્યરત્નાકરં
શ્વેતારણ્યપતેઃ પ્રસાદમયતે દ્વેધાસ્થિતા પાર્શ્વયોઃ ॥ ૯॥

કાવેરિ ત્વત્સ્તોત્રમેતત્ પઠન્તિ
શ્રદ્ધાશુદ્ધા ભક્તિયુક્તા ભવત્યામ્ ।
સ્નાતાપુંસાં વારિપૂરેત્વદીયે
યાવત્પુણ્યં તાવદેતે લભન્તામ્ ॥ ૧૦॥

સહ્યજાસ્તવન રત્નમાલિકા
ત્યાગરાજમખિનો મુખોદ્ગતા ।
ગૃહ્યતાં પરગુણૈકશંસિભિઃ
શઙ્કરાઙ્ઘ્રિ કમલે સમર્પિતા ॥ ૧૧॥

કદાવા કાવેરિ ત્વયિ વૃષભતીર્થેઽચ્છસલિલે
તુલામાસે દર્શેસતિ ગગનમધ્યેસવિતરિ ।
સમસ્તાભિર્ગઙ્ગા પ્રભૃતિતટિનીભિસ્સમુદિતે
વિગાહિષ્યે વિપ્રૈર્નિગમનિરતૈઃ પૂરિતતટે ॥ ૧૨॥

ઇતિ ત્યાગરાજમખિવર્યકૃતિષુ
કાવેરીનવરત્નમાલિકાસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Suresh Pitre suresh.pitre at gmail.com

*kAverI athavA sahyajAnavaratnamAlikA*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*